# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New&Old)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.3.5.10** | समयः- 3 तः 6पर्यन्तम् |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – श्रीभाष्यम् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधस्तनेषु प्रश्नेषु द्वयोः कयोश्चित् प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ अथशब्दस्यार्थं यथाग्रन्थं निरूपयत।

२ ब्रह्मजिज्ञासाशब्दस्यार्थं सविशदं प्रतिपादयत।

३ ब्रह्मजिज्ञासायां  कर्मज्ञानस्य आवश्यकतां यथाग्रन्थमुपपादयत।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ 'अथातो ब्रह्मजिज्ञासा' सूत्रमिमं विशदयत।

२ अनुभूतेः स्वप्रकाशत्वं, नित्यत्वं, निर्विकारत्वं एकत्वञ्च यथाग्रन्थं समर्थयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनेषु प्रश्नेषु द्वयोः कयोश्चित् प्रश्नयोः व्याख्यात्मकमुत्तरं लिखत।** १०

१ भेदाभेदवादं पाठ्यग्रन्थदिशा निराकुरुत।

२ ज्ञातृमिथ्यात्वं खण्डयत।

३ सुषुप्त्यादौ अहं पदार्थस्य प्रकाशत्वं प्रतिपादयत।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत ।** १०

१ 'तत्त्वमसि' महावाक्यं विवेचयत।

२ अज्ञानस्य भावरूपत्वं विवेचयत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ अधस्तनेषु प्रश्नेषु द्वयोः कयोश्चित् प्रश्नयोः व्याख्यानं यथाभाष्यं विधेयम् ।** **१०**

१ 'शास्त्रयोनित्वात्' सूत्रमिदं प्रतिपाद्यताम्।

२ 'तत्तु समन्वयात्' सूत्रमिदं निरूप्यताम्।

३ ग्रन्थकारस्य परिचितिं लिखत।

**प्रश्न ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **१०**

१ किं पुनस्तद्ब्रह्म, यज्जिज्ञास्यमुच्यते, इत्यस्य सम्यग्विवेचनं कुरुत।

२ 'जन्माद्यस्य यतः' इत्यस्य सूत्रस्यार्थं प्रतिपाद्य ब्रह्मणः जगज्जन्मादिलक्षणत्वं समर्थयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ 'ब्रह्मजिज्ञासा' इत्यत्र कः समासः?

२ मीमांसाशास्त्रस्यादिमं सूत्रं किम्?

३ समित्पाणिः शिष्यः ब्रह्मनिष्ठं श्रोत्रियं गुरुं किमर्थमभिगच्छेत्?

४ 'ब्रह्मसत्यं जगन्मिथ्या' इति कस्य सिद्धान्तः?

५ श्रीभाष्यस्य रचयिता कः?

६ सिद्धान्ते प्रमाणानि कति सन्ति? के च ते?

७ किं द्रव्यं प्रभा प्रभावद् रूपेणावतिष्ठते?

८ अहम्पदवाच्यः कः?

९ को नाम व्यापी?

१० तमः द्रव्यमस्ति न वा?

११ जन्मादिपदेन किं ग्राह्यम्?

१२ भृगुः कस्य पुत्रः आसीत्?

१३ कस्तेजोऽसृजत्?

१४ कौ द्वावजौ?

१५ ब्रह्मसूत्रस्य कर्ता कः?